CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मणिहरणं नाम रूपकम्*

जग्गू वकुलभूषणः

सीताकरग्रहणकन्दलितप्रमोदः
क्षत्रेभकेसरिणमापतितं क्रुधान्धम् ।
यो भार्गवं दमयति स्म सलीलमस्मान्
रामस्स पातु परिवर्धितबन्धुहर्षः ॥ १ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः—(सानन्दम्) एवमार्यमिश्रान्विज्ञापयामि ।

नानानाटकनिर्माता यः कोविदमुदावहः ।
स एवास्यापि कर्ता हि जग्गू वकुलभूषणः ॥ २ ॥

अये, किं नु खलु मयि विज्ञापनैकताने, शब्द इव? (परिक्रम्य) आम्, ज्ञातम् ।

दुर्योधनस्य भग्नोरोः प्रीणनार्थममर्षणः ।
कृतप्रतिज्ञस्सम्प्राप्तो द्रौणिश्शत्रुजिघांसया ॥ ३ ॥

(निष्क्रान्तः ।)

(स्थापना)

(ततः प्रविशति धनुष्पाणिरश्वत्थामा ।)

अश्वत्थामा (सोद्धतं परिक्रम्य)—मातुल, मातुल!

(प्रविश्य)

कृपः—वत्स, अयमस्मि ।

अश्वत्थामा—सत्वरमायाहि ।

कृपः—वत्स, कोऽयमारम्भः?

---

* भासमहाकविविरचितोरुभङ्गस्य उत्तरभागः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अश्वत्थामा(सशीर्षान्दोलनम्)—हुं, कोऽयमिति, न जानासि कुरुराजप्रीणनम्?

कृपः—अलममर्षणेन।

यदर्थमयमारम्भस्स स्वर्गमगमत्प्रभुः।
तदलं क्षात्रधर्मेण ब्राह्मणानां धनं शमः॥ ४॥

अश्वत्थामा—मातुल, जानामि, जानामि।

कृपः—बहुश्रुतः खल्वसि।

अश्वत्थामा—हन्त! अवहेलनम्।

कृपः—शान्तं पापं, शान्तं पापम्।

अश्वत्थामा—किमन्यत्।

कृपः—ब्राह्मण्यमनुस्मारितः।

अश्वत्थामा—किं विस्मृतब्राह्मण्योऽस्मि?

कृपः—अथ किम्।

अश्वत्थामा—कथमवगतम्?

कृपः—भवतो वृत्त्या।

अश्वत्थामा(सामर्षम्)—हन्त! सर्वापि विस्मृता किमु पाण्डवानां दुश्शीलता? मातुल, कथमस्मत्पितृवधः, कथं महाराजः पातितः, अपि स्मरसि राधेयवधम्? हुं, शृणोतु भवान्, तदिदानीं—

युद्धे प्रचण्डबलदर्पितबाहुजौघ-
प्रध्वंसनाय करयन्त्रितकार्मुकोऽहम्।
ब्राह्मण्यचिन्तनमपास्य कृपां व्यपोह्य
संवर्तभर्गविभवो ननु भार्गवोऽस्मि॥ ५॥

तदलमुपदेशेन।

कृपः—नाहमुपदेष्टा। कुतो वाद्यापि वृत्तिरीदृशीति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अश्वत्थामा—आम्, महाराजस्य धुरि कृतप्रतिज्ञः खल्वश्वत्थामास्मि ।

कृपः—तत्सत्यम्, अपि जानासि, कीदृशी गतिरनया वृत्येति?

अश्वत्थामा—जानाम्येव, या गतिस्सर्वथा पापात्मनः ।

कृपः—तर्हि, निवर्तस्व ।

अश्वत्थामा—भवतु, भवतु, तद्दत्वा निवर्तिष्ये ।

कृपः—किं तत्, कस्मै दास्यसि?

अश्वत्थामा—गुरुघातकस्य यत्फलम् ।

कृपः—वत्स, मरणान्तं खलु वैरं, उपरते राजनि किमस्माकम्?

अश्वत्थामा—मातुल, किं नु खलु मरणान्तं वैरमिति? जीवति खलु स पापी गुरुघातकः ।

कृपः—ते तु स्वपन्ति । नहि सज्जाः । यैस्साकमभिलषसि युद्धम् ।

अश्वत्थामा—स्वपन्तु, दीर्घं स्वपन्तु, तान्पशुमारं मारयामि ।

कृपः—वत्स, अनुचितमिदम् ।

अश्वत्थामा—मातुल, उचितमनुचितं वा स्यात्, शिबिरप्रतीहारे जागरूकेण खड्गपाणिना भवता भवितव्यम् । (साटोपं परिक्रम्य) हन्त !

नखकण्डूयनापोह्यं व्याप्तमङ्गेषु साम्प्रतम् ।
कुठारेणापि दुर्भेदं निरुणद्धि दृशौ तमः ॥ ६ ॥

तन्मन्दमागच्छत्वार्यः । (मन्दं परिक्रम्य) क्व नु खल्वागतोऽस्मि? (कञ्चित्कालं स्थित्वा निर्वर्ण्य) आम्, ज्ञातं, अयं शिबिरदेशः ।

दूष्याणि निर्मोकशुचीन्यमूनि
स्वकेतुचेलैस्तरलैस्समन्तात् ।
समापतन्तं निबिडान्धकारं
बलान्नुदन्तीव गुणाभिमानात् ॥ ७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आर्य, तन्नरमेधाय प्रविशामस्तावच्छिबिरयज्ञवाटम् ।

(निष्क्रान्तौ ।)

(शुद्धविष्कम्भः)

(ततः प्रविशति नकुलसहदेवाभ्यां द्रौपद्या च सह निजपटगृहोपविष्टो युधिष्ठिरः ।)

युधिष्ठिरः—हन्त, कल्यमपि मन्दमपयाति ।

चिरगतमुदयाद्रिसानुभाजं हरितहयं पुरुहूतदिक्तटाके ।
अरुणकमलिनीपरम्परा प्राक् पतिमनुपालयतीव सानुरागम् ॥ ८ ॥

याज्ञसेनि, दिष्ट्या वत्सो भीमस्समुत्तीर्णसङ्गरमहार्णवः । अर्जुनोऽपि तथा । हन्त! कथमार्यो भीष्मः, कथमाचार्यो द्रोणः, कथमप्रधृष्यो राधेयः, स्मृतास्तु धार्तराष्ट्राः, रोमाञ्चयन्ति गात्राणि । सैन्धवोऽपि तथा ।

द्रौपदी (सबाष्पम्)—वत्समभिमन्युं स्मृत्वा निर्विण्णं भवति हृदयम् ।

युधिष्ठिरः—किं कुर्मः? तेनापि महत्कृतं हि कर्म । सा तु तपस्विनी सुभद्रा त्वत्पुत्रेष्वेवात्मपुत्रनिर्विशेषवात्सल्या खलु । सर्वं विधिविलसितम् । ननु धृष्टद्युम्नेनापि कीदृगाचरितमद्भुतं कर्म?

द्रौपदी—दिष्ट्या स एक एवास्माकं पक्षे सेनानायकः ।

युधिष्ठिरः—दिष्ट्या विजयिनो वयम् ।

(पटाक्षेपेण प्रविश्य)

वृद्धकञ्चुकी-हा! हतोऽस्मि ।

(अधःपतति ।)

युधिष्ठिरः (सावेगम्)—किं नु खलु, कोऽयम्?

(मन्दमुत्थापयति ।)

कञ्चुकी—(सगद्गदम्) अहमस्मि मन्दभाग्यः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

युधिष्ठिरः—कथं? धृष्टद्युम्नस्य वृद्धकञ्चुकी गालवः? आर्य! किमुपनतम्?

कञ्चुकी—सर्वे हताः।

द्रौपदी—(सावेगम्) (संस्कृतमाश्रित्य) आर्य! सुस्पष्टं कथय।

कञ्चुकी—अम्ब! कथं कथयेयम्?

द्रौपदी—पीडयत्यावेगः! सत्वरमावेदय।

कञ्चुकी—अम्ब! भवत्या भ्राता।

द्रौपदी—कथं!

कञ्चुकी—पुत्राश्च,

द्रौपदी—हा हतास्मि! (मूर्छिता पतति।)

युधिष्ठिरः (सगद्गदम्)—समाश्वसिहि।

द्रौपदी—(उत्थाय, आत्मानमेवोद्दिश्य) द्रौपदि! ननु द्रौपद्यसि, चिरं जीव। सन्तापानुभवायैव खलु पावकप्रभवासि। हुं! कृतजलावगाहस्य न खलु वातभीतिः नापि शीतबाधा। सत्यम्, (सोन्मादहासं) हन्त! परिदेवनमपि विडम्बनम्। लोकविलक्षणा खलु पाञ्चाली, यतो हन्त! शूराः पञ्च वल्लभाः, किमहं द्रौपदी, नहि....नहि, दुःखग्रन्थिरस्मि। पाञ्चालि! धीरा भव। न शक्नोति नियतिरितःपरं किमपि कर्तुम्।

युधिष्ठिरः (सगद्गदम्)—तात! केन हताः।

कञ्चुकी—देव! जिह्वा परावर्तते। कथं कथयेयम्?

युधिष्ठिरः—निवेदय, स महात्मा कः।

कञ्चुकी—हन्त! हताः पापात्मनाश्वत्थाम्ना।

नकुलसहदेवौ—हन्त! कठोरता।

युधिष्ठिरः—कथं, आचार्यपुत्रेण? हन्त! तात! किं सर्वे हताः?

कञ्चुकी—अथ किम्।

युधिष्ठिरः—केन मोचितो भवान्?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कञ्चुकी—अनेन वृद्धभावेन ।

युधिष्ठिरः—भवतु, स एव दयालुः । अथ न केनापि स वारितः ?

कञ्चुकी—देव! सुप्ताः कथं वारयन्ति ।

द्रौपदी—कथं, सुप्ता हताः पापिना ?

युधिष्ठिरः—पाञ्चालि! अलं प्रलपितेन । स त्वाचार्यपुत्रः खलु!

द्रौपदी—आः! आचार्यपुत्र इति । हुं! निकृत्तं तच्छीर्षमनवलोक्य नाहमश्नामि ।

(प्रविश्य)

सुभद्रा—किं नु खलु (स्तम्भीभूय तिष्ठति ।)

युधिष्ठिरः—ब्राह्मणः खलु!

(प्रविश्य)

भीमः (सावेगम्)—किमिदम् ?

द्रौपदी (सामर्षम्)—किमिदमिति ? आर्यपुत्रं पृच्छ त्वार्यपुत्रः ।

युधिष्ठिरः—पृच्छतु दैवम् ।

भीमः—किं नु खलु न किञ्चिदपि स्फुरति ? आर्य गालव! किमेतत् ?

कञ्चुकी—कुमार! किं कथयेयम् ?

गाढनिद्रासमासक्तं धृष्टद्युम्नं प्रबोध्य सः ।
अहन् द्रौणिर्विशस्यैव भवतां तनयांस्तथा ॥ ९ ॥

सुभद्रा—हा हतास्मि! (मूर्छिता पतति ।)

भीमः—(सगद्गदम्) हा वत्साः! हा महावीरसेनापते!

सुभद्रा (मन्दमुत्थाय)—सत्यपि पाण्डवप्राणे चक्रपाणौ किमिदमेवम् ?

द्रौपदी—सुभद्रे! सुभद्रा खल्वसि, गृहाण कशाम् । सज्जीकुरु रथम् । पौरुषाभिमानिनस्त्वेते पश्यन्त्ववलां पाञ्चालीम् । (इति कोशात्खड्गमाकृष्य तिष्ठति ।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भीमः—याज्ञसेनि! अलममर्षेण । अहमस्मि, (गालवमवलोक्य) केदानीं स सृगालः?

कञ्चुकी—क्वापि पलायितः ।

द्रौपदी—आर्यपुत्र! निकृत्तं तच्छीर्षमनवलोक्य नाहमश्नामीति प्रतिज्ञातम् ।

भीमः—साधुकृतं पाञ्चाल्या । प्रस्थितोऽहमिदानीम् । क्व रथः?

नकुलः—गतोऽहम् । (निष्क्रान्तः ।)

युधिष्ठिरः—वत्स! अनुचितमिदं, स त्वाचार्यपुत्रः ।

भीमः—आर्य!

धर्मो धर्म इति प्रलोभ्य वचसा त्यक्त्वा च धर्मं स्वकं
वंशोऽयं विनिपातितो हि भवता नाद्यापि ते पौरुषम् ।
त्वद्दासा वयमप्यहो निगडिता यत्पूज्यभावेन हा
पाञ्चाल्या इह नः करग्रहजुषः किं वा सुखं चिन्तय ॥ १० ॥

तदलमुपदेशेन ।

(प्रविश्य)

नकुलः—सज्जो रथः ।

भीमः—पाञ्चालि! अलं शोकेन, प्रस्थितोऽस्मि ।

(नकुलेन सह निष्क्रान्तः ।)

युधिष्ठिरः—न जाने किं वा भविष्यतीति ।

द्रौपदी—हुं, किं वा भविष्यतीति, यद्भव्यं, तदेव ।

गुरुबुध्या निवर्तेध्वं यदि यूयमहं वधूः ।
निकृत्य कन्धरां तस्य लभेय कृतकृत्यताम् ॥ ११ ॥

(ततः प्रविशति वासुदेवेन सहार्जुनः ।)

अर्जुनः—वासुदेव! कर्तव्यं सर्वमपि कारितं भवता । वयं च कृतकृत्याः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वासुदेवः—अलमद्यैव कृतकृत्यत्वेन ।

अर्जुनः—किं नु खलु एवमभिधीयते ?

वासुदेवः—आम्, जीवति खलु द्रौणिः ।

अर्जुनः—जीवतु नाम ।

वासुदेवः—किं नु खलु, जीवतु नामेति । शृणु तावत्, स तु—

लब्धब्राह्मणजन्मापि शरारुश्शरजीवनः ।
कृत्याकृत्यविवेकान्धो भवद्भ्यो द्रुह्यति ध्रुवम् ॥ १२ ॥

(परिक्रम्य) किं नु खल्विदम्—

लुलितचिकुरा धीरा रोषात्सुताम्रविलोचना
द्रुपददुहिता तिष्ठत्यग्रे कृपाणकराम्बुजा ।
नमितवदना शोकात्सेयं स्वसापि ममाकुला
शिरसि विदधत्पाणिं पीठे निषीदति धर्मराट् ॥ १३ ॥

(उपसृत्य) आर्य! किमेतत् ?

युधिष्ठिरः—(सगद्गदम्) भगवन्!

यदर्थमवतारस्ते तदासीत्साधु साम्प्रतम् ।
कुरुवंशकरीरोऽपि यस्मादिह न शिष्यते ॥ १४ ॥

वासुदेवः—अम्ब! द्रौपदि, किमिदम् ?

द्रौपदी—महावीरान्पृच्छ मे वल्लभान् ?

अर्जुनः—प्रिये! सुभद्रे, किं नु खल्विदम् ?

सुभद्रा—किं कथयेयं मन्दभागिनी ?

वासुदेवः—आर्य गालव! किं नु खल्विदम् ?

कञ्चुकी—अधन्यः कथयामि । (सगद्गदं तिष्ठति ।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वासुदेवः—हन्त! सर्वेऽप्येकरूपाः! गालव! कथय ।

कञ्चुकी—प्रसुप्ता हताः पापिना द्रौणिना द्रौपदेयाः, धृष्टद्युम्नश्च ।

वासुदेवः—कथम् ?

अर्जुनः—(सोद्वेगं निःश्वसन्) प्रसुप्ता हताः ? (गाण्डीवमवस्रंसयति ।)

वासुदेवः—क्व स पापी ?

कञ्चुकी—क्वापि पलायितः ।

वासुदेवः—सखे! गृहाण गाण्डीवम् । (आदाय ददाति ।)

कञ्चुकी—प्रस्थितो धन्वी भीमः ।

वासुदेवः—कथम्, एक एव ?

कञ्चुकी—अथ किम् ।

वासुदेवः—हन्त! महान्प्रमादः । स तु पापी द्वीपीव प्राणात्ययावसरे ।
तदचिरात्प्रयातु श्वेतवाहनः ।

युधिष्ठिरः—हा हन्त! सन्तापः । (आसनादधः पतति ।)

(पटाक्षेपेण प्रविश्य)

चेटी—परित्रायतां, परित्रायतां, उदराभ्यन्तरे सन्तापः । परिस्फुरति गर्भभर
इति परिलुठत्युत्तरा ।

अर्जुनः—हन्त! सन्तापः ।

सहदेवः—हा हतोऽस्मि । (पतति ।)

वासुदेवः—(विचिन्त्य) द्रौणिप्रयुक्तस्यापाण्डवेयास्त्रस्य महिमा । भवतु सखे!
अलमावेगेन, प्रयुंक्ष्व ब्रह्मशिरोऽस्त्रम् ।

अर्जुनः—(तथा कृत्वा) सद्यः प्राणिमि ।

(युधिष्ठिरः उत्थायोपविशति ।)

(सहदेवः मन्दमुत्थाय तिष्ठति ।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वासुदेवः—पश्यामस्तावदुत्तरा कथमिति । (चेट्या सह निष्क्रान्तः ।)

(ततः प्रविशति रथस्तम्भनियन्त्रितकरयुगलेनाश्वत्थाम्ना सह भीमः ।)

भीमः—(सानुतापम्) आचार्यपुत्र! ब्राह्मणोत्तमोऽसि ननु, हुम् ।

ब्राह्मण्यं किल बहुजन्मपुण्यलभ्यं
सर्वैरप्यवनतमस्तकैः प्रतीक्ष्यम् ।
दौर्जन्यं कथमिव वर्णयाम्यहं ते
स्याद्व्याधोऽप्यतिकरुणः कदाचिदार्तः ॥ १५ ॥

अश्वत्थामा—अलमतिविकत्थनेन, नाहं व्याधः ।

भीमः—(सस्मितम्) सत्यम्, न खलु कृन्तति व्याधः प्रसुप्तान्, पुण्यजनोऽसि ।
(युधिष्ठिरमुपसर्पति ।)

युधिष्ठिरः—(सोद्वेगम्)

नवशोणितमीकरार्द्रचेलो व्रणरन्ध्रप्रसरद्वसाविलाङ्गः ।
श्लथलोलशिखो भवान्किमस्मद्गुरुपुत्रो ननु ते दशातिशोच्या ॥ १६ ॥

द्रौपदी—नालमेतावतैव ।

(अश्वत्थामा द्रौपदीमवलोक्य सभयकम्पं शिरो नमयति ।)

भीमः—आर्य !

निजधर्मं परित्यज्य परधर्माश्रयेण यः ।
दशामनुभवत्येतां सोऽयं ते स्थापितो धुरि ॥ १७ ॥

युधिष्ठिरः—अलमवहेलनेन, पीडितं पुनरपि मा पीडय ।

(प्रविश्य)

वासुदेवः—हन्त! शरारुता ब्राह्मणस्य, अथवा नराधमस्य ।

अर्जुनः—(सावेगम्) किं संवृत्तम् ?

वासुदेवः—(दीर्घं निःश्वस्य) किमन्यत् ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

द्रौपदी—(सगद्गदम्) वासुदेव! दयालवे निवेदयार्यपुत्राय ।

अर्जुनः—हन्त! धर्मपरिवृत्तिः ।

सुभद्रा—(सगद्गदम्) चक्रपाणे! भवन्तमग्रजन्मानं लब्ध्वापि ममेयं दशा?

वासुदेवः—वत्से! अलं शोकेन । कथमपि जीवयिष्यामि गर्भशिशुम् । स तु वंशकरो भविष्यति ।

भीमः—वासुदेव! नायं निषूदितः ब्राह्मण्यानुचिन्तनेन ।

वासुदेवः—(सस्मितम्) किमस्ति ब्राह्मण्यमस्मिन्?

भीमः—अस्ति किल जात्या ।

अश्वत्थामा—वृत्त्याप्यस्ति ।

वासुदेवः—निर्लज्ज! किमियमेव ।

द्रौपदी—अथ किमथ किम्, भ्रूणहत्या किल ब्राह्मणवृत्तिः ।

अश्वत्थामा—वाचाटे! स्मर तावदग्रजन्मानम् ।

द्रौपदी—भवतु, स्मारयामि ।

अर्जुनः—किमियं कृतकार्यश्लाघा?

अश्वत्थामा—अलं वाचाटतया ।

आश्रितक्षत्रधर्मापि श्रियं ब्राह्मीं त्यजेय किम् ।
पङ्किलं रत्नमाप्नोति क्षालनात्कान्तिमुत्तमाम् ॥ १८ ॥

वासुदेवः—(सहासम्) अलं केवलेनाभिमानेन । अप्यस्त्यात्मनि विश्वासः ।

आम्नायाभ्यसनं कृतं हि भवता वेदान्तचिन्ता तथा
कायक्लेशकरं व्रतं हुतमहो सर्वं च निर्वर्तितम् ।
वृत्त्यर्थं दृढकार्मुकव्यसनतः कालं क्षिपन्क्षत्रियान्
धिक्कुर्वन्परुषाक्षरैः प्रलपसि ब्राह्मण्यमाशैशवात् ॥ १९ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

द्रौपदी—कर्मानुगुणं किल फलं प्रत्यक्षमिदानीम् ।

अश्वत्थामा—विकत्थनपरे! किमबला त्वम् ?

भीमः—तिष्ठ! रे, किमबलया नृशंसयापि क्रियते? यत्कृतं घातकेन भवता ।

अर्जुनः—स्वकृतं पौरुषकृत्यं मनुते ।

द्रौपदी—(सामर्षम्) किमनयोक्तिप्रत्युक्तिकया? वासुदेव! कथमिदानीं मे प्रतिज्ञा ?

वासुदेवः—किं नु खलु, प्रतिज्ञापि ।

भीमः—अथ किम्, निकृत्तं तच्छीर्षमनवलोक्य नाहमश्नामीति ।

अश्वत्थामा—(सदन्तपीडम्) नृशंसे! गुरुघातुकस्य स्वसा किल भवती ।

अर्जुनः—(सामर्षं द्रौपदीहस्तात्खड्गमाच्छिद्य) नराधम! प्रसुप्तहन्ता खलु पापीयान्भवान् । (मुष्ट्या तच्छिखां गृह्णाति ।)

(सरभसं प्रविश्य)

व्यासः—मा खलु, मा खलु—

निर्बध्य द्विजहननेन पाण्डवा वो
न श्रेयः किल चिरकीर्तिसंप्रणाशः ।
दौरात्म्यं निरुपममस्ति यद्यपीड्य
ब्राह्मण्यप्रशमनहेतुभूतमस्मिन् ॥ २० ॥

(सर्वे प्रणमन्ति ।)

अश्वत्थामा—भगवन्! वाचायं प्रणामः ।

व्यासः—भवतु वत्स! चिरजीवी भव ।

अश्वत्थामा—कथं, चिरजीवी ।

व्यासः—वत्स! कोऽयं वेषः, शोचनीयोऽसि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अश्वत्थामा—कथम्, अहं, न ह्येते दुरात्मानः पाण्डवाः ।

व्यासः—सत्यम्, एतेऽपि भवत्कर्मणा ।

अश्वत्थामा—हन्त! पाण्डवपक्षपातिता, मय्येव पात्यते तावदपराधः ।

व्यासः—(सस्मितम्) अहं तावद्धर्मपक्षपाती ।

अश्वत्थामा—तर्हि, चिन्त्यतां सङ्ग्रामप्रसङ्गः ।

व्यासः—हुं, क्षत्रियः किं भवान् ?

अश्वत्थामा—कथमहं क्षत्रियः ?

व्यासः—तर्हि, कुतो वा पाण्डवैस्सह द्वेषः ?

अश्वत्थामा—एते दुर्योधनद्वेषिण इति ।

व्यासः—किमु बन्धुस्ते दुर्योधनः ?

अश्वत्थामा—अथ किम्, अन्नदाता किल ।

व्यासः—हन्त! व्यामोहः—

दुर्मेधसामन्नविवर्धितं ते विनश्वरं वत्स शरीरमेतत् ।
नानाशरीरान्तरनुप्रविष्टो ज्ञानान्नपुष्टो नु कदा वदात्मा ॥ २१ ॥

अश्वत्थामा—(मन्दम्) हन्त! पोषितं शरीरं, नात्मा ।

व्यासः—भवत्कर्मणे कीटजन्मापि नालम्! वत्स!

पुण्यनिश्श्रेणिमारुह्य ब्राह्मण्याद्रिशिरस्स्थितः ।
आत्मा दुष्कर्मपाशेन पातितोऽधो निरन्तरम् ॥ २२ ॥

अश्वत्थामा—(सानुतापगद्गदम्) सत्यमभिहितमार्येण । इदानीमश्वत्थामा हतः, न तदानीम् । हन्त! भोः, पापात्मा खल्वश्वत्थामा । (सबाष्पम्) किं तद्ब्राह्मणकृत्यं, यन्मया कृतम्? (सशीर्षान्दोलनम्) नहि-नहि, (सदन्तपीडमक्षि परिघूर्णयन्कृष्णमवलोक्य) अये! वञ्चनैकतान पाण्डव-पक्षपातिन्! नाहं भवदीयः, जगदखिलमपि भवदायत्तं ननु, किमहमेको

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

बाह्यस्संवृत्तः, कारितमेतदखिलमपि त्वयैव । (उच्चैः) नाहं कर्ता । सत्यमिदं, नाहं कर्ता, अपवादः परं मयि पातितः । (सनिर्वेदम्) हन्त ! (मन्दम्) सुप्ता मुधा घातिताः, आत्मा त्वन्धकारकूपे पातितः, (सदन्तपीडम्) धिगेनं माम्, (सबाष्पगद्गदम्) भगवन्वासुदेव! क्षन्तुमर्हसि वागपराधम् । वासुदेव! वासुदेव! भवता बोधितोऽप्यभिमानी संवृत्तः । भगवन्! विधीयतां प्रायश्चित्तं, दहति मामनुतापाग्निः ।

भीमः—किमनुतापोऽपि भवतः ?

द्रौपदी—नाहं प्रत्येमि, कथं वा दावानले कदलीकाण्डप्ररोहः ?

अर्जुनः—किं नु खलु, प्रायश्चित्तं, हन्त! शिरश्छेदनमेव ।

अश्वत्थामा—(मन्दम्) हन्त! शिरश्छेदनं, शिरश्छेदनं! (उच्चैः) गाण्डीविन्! साधूक्तं, तथास्तु, इदमवनामितं शिरः । (शिरो नमयति ।)

(अर्जुनः द्रौपदीं पश्यति ।)

द्रौपदी—आर्यपुत्र! निर्वर्तनीया खलु प्रतिज्ञा ।

व्यासः—वत्से! नान्यथा भवति मदाशीः ।

द्रौपदी—भगवन्! कथमिदानीम् ?

व्यासः—शिरोनिकृन्तनकल्पे हि सहजमस्तकान्तर्मणिहरणम् ।

वासुदेवः—साधूक्तमार्येण ।

(अर्जुनः तच्छिरो विदार्य रत्नमाहरति ।)

(अश्वत्थामा वेदनया परिवेष्टते ।)

युधिष्ठिरः—वत्स! मारुते! मोचय बन्धनात् ।

(भीमः तथा करोति ।)

व्यासः—(नेपथ्याभिमुखमवलोक्य)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कठोरमार्तण्डसहस्रतेजा निमीलयन् लोकविलोचनानि ।
अभ्येति दिव्याभरणाञ्चिताङ्गः कोऽयं पुमान्प्रांशुरमर्त्यवन्द्यः ॥ २३ ॥

(प्रविश्य)

सुदर्शनः—देवदेव ! अभिरक्षितगर्भभरा प्रासूत पुत्ररत्नमुत्तरा ।

सर्वे—प्रियं नः, प्रियं नः ।

वासुदेवः—महान्प्रमोदः, प्रयातु भवान् ।

(सुदर्शनः अश्वत्थामानं पश्यन्सस्मितमन्तर्दधाति ।)

अश्वत्थामा—दिष्ट्या वचनीयाद्विमुक्तोऽस्मि ।

व्यासः—एवं किल भगवतो वासुदेवस्यानुग्रहः ।

अश्वत्थामा—(साञ्जलिबन्धम्) कथमहमितः परम् ?

व्यासः—वासुदेवादेशमनुतिष्ठ ।

अश्वत्थामा—भगवन् ! वासुदेव !

निरन्तरं यद्यपि निन्द्यकर्मा जाल्मोऽभवं लोकविगर्हणीयः ।
कृतेऽनुतापोऽप्युदभून्ममाद्य तदादिश ब्राह्मणतासमृद्ध्यै ॥ २४ ॥

वासुदेवः—सर्वथा मनोजवसोऽसि, गौरीगुरोरुपत्यकायां सुचिरं तपश्चर ।

अश्वत्थामा—यथादिशति भगवान् । (सर्वानप्यवलोक्य) अम्ब ! द्रौपदि ! क्षन्तुमर्हसि पापिनं माम् । (निष्क्रान्तः ।)

अर्जुनः—पाञ्चालि ! गृहाण मणिमेनम् ।

(द्रौपदी वासुदेवं पश्यति ।)

(वासुदेवः व्यासं पश्यति ।)

व्यासः—(सस्मितम्) गृह्णातु पाञ्चाली ।

द्रौपदी—(आदाय) हन्त ! मणिरयं मय्यप्यनिर्वचनीयमाविर्भावयति तेजः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

व्यासः—अनेनैव द्रौणिरुद्धतः । पाञ्चालि! समर्पयैनं युधिष्ठिरमौलौ ।

(द्रौपदी सलज्जं तथा करोति ।)

व्यासः—सार्वभौम! किं ते भूयः प्रियमुपहरामि ।

युधिष्ठिरः—(साञ्जलिबन्धम्) भगवन् !

जीवन्विमोचितो द्रौणिः पाञ्चाल्यप्यभिरक्षिता ।
आपीडतां मणिर्नीतः किमितोऽप्यस्ति मे प्रियम् ॥ २५ ॥

तथापीदमस्तु भरतवाक्यम्-

नेतारः परिपालयन्तु भुवनं न्याय्येन सम्यग्यथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी ।
कासारा रसपूरिता विटपिनः पुष्पैः फलैस्सम्भृताः
सस्याढ्या धरणी च सन्तु समये वर्षन्तु धाराधराः ॥ २६ ॥

॥ इति मणिहरणं नाम रूपकं समाप्तम् ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha